श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

कोटिकन्यादानं श्री कृष्णताताचार्यविरचितम्

# ॥ श्रीमदाण्डवाभ्युदयम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमदाण्डवाभ्युदयम् ॥

कान्तश्रीकान्त शुद्धान्तसिद्धान्तोदन्त पेटिकाः।
जयन्त्यस्मद्गुरुवराः प्राप्ताप्राकृत घोटकाः ॥ 1 ॥

कालियार्दन पादाब्ज परिचर्याधुरन्धराः।
जीयासुर्द्राविडाम्नाय भाष्यकृद्वंशजा भुवि ॥ 2 ॥

यदुपतिवरपद्मपादसेवा
रसकलशाब्धि विलीनभद्रभावाः।
विदधतु परमार्थ कूकुदेन्द्राः
श्रियमिह नः कुरुकेश सूरिवंश्याः ॥ 3 ॥

चित्तेवाचि दृशोश्शुभे करयुगे दक्षे भुजे विग्रहे
सर्वत्रापि सुदर्शनं कलयतामाचार्य लक्ष्मश्रियाम्।
कारुण्यान्निज संश्रितानपि तथा भूतान् द्रुतं तन्वतां
श्रीमद्द्राविडभाष्यकृत्कुलभुवामङ्घ्रिं गुरूणां श्रये ॥ 4 ॥

गुरुघण्टां सुवर्णाङ्गीं तामाद्यामभिवादये।
न पूज्यते रमेशोऽपि विना यदभिवादनम् ॥ 5 ॥

प्राचेतसागमसमृद्ध गुरुप्रवीरं
श्रीभाष्यकारगुरुवर्यमखण्डबोधम्।
भक्त्यापितामहपितुःपितरं नतोऽस्मि
श्रीशैलपूर्णमहिवल्लभयोगिनं च ॥ 6 ॥

श्रीरङ्गेशपदत्राणयुगली सततं मम।
कुर्यादचञ्चलां लक्ष्मीममलां धिषणामपि॥ 7 ॥

श्रियं श्रयेऽहं शिरसा या स्ववाराशिसश्रियः।
स्वेशस्योरसि संसेव्या स्ववाराशाविव स्वयम्॥ 8 ॥

विशालवक्षःस्थलशोभितालये
निरन्तरानन्द रमाधरामृतम्।
पातुं सुदीर्घीकृत सुन्दराननं
हयाननस्यास्य तनोतु नस्सुखम्॥ 9 ॥

मनोज्ञमन्दारमरन्दपूर -
माधुर्यमन्दाक्षतवाक्प्रवाहम्।
यस्य क्षणार्धस्मृतिरेवसूते
भायात्स धीशो हृदि सप्रकारम्॥ 10 ॥

अबद्धं मच्चित्तं हयमुख ! दरिद्रं च नयनं
रविर्भासां ज्योतिर्घटयति दृशौ हेयविषये।
शुनीवोच्छिष्टं मे स्पृशति हृदयं गर्ह्य विषयान्
बतार्वास्य ! त्वं मे घटय हृदयं भव्य विषये॥ 11 ॥

वंशे जातः प्रथितयशसां कोटिकन्याप्रदाने
दृष्टस्सद्भिर्वरदसुमहालक्ष्मणार्यैश्च सम्यक्।
मानाभ्यर्हं महितविषयं संयमीन्द्राण्डवस्य
भक्तिश्रद्धाप्रभृतिवशगो वैभवं सन्तनोमि॥ 12 ॥

अस्ति स्वस्तिकरी भुवः सुमनसामानन्दसन्दायिनी
भूम्ना निर्जित देवराजनगरी श्रीरङ्गपूराह्वया।
या क्षोणीसुरसञ्चयैरधिगता धर्म्यैस्सदाचाण्डवैः
निर्मर्यादमनश्वरं निवसतां नित्यं प्रसूते सुखम्॥ 13 ॥

तां रङ्गनाम्नीं नगरीं विहाय
देशाननेकान् प्रति यातुकामः।
वेदान्तरामानुजसार्वभौमः
सच्छिष्यवर्गैस्सहसा प्रतस्थे ॥ **14** ॥

डोलां समादाय महर्षिकल्पाः
द्विजाग्रगण्याः पुरतः प्रयाताः।
पश्चात् त्रिदण्डाञ्चित पाणिपद्मः
मुनिः प्रतस्थे शुकतुल्यशीलः ॥ **15** ॥

मध्ये द्विजानां महितस्वभूम्नां
वेदान्तयोगी नितरां विरेजे।
तारागणैसंवलितः क्षपायां
कलायुतश्चन्द्र इवावतीर्णः ॥ **16** ॥

ग्रामे ग्रामे मनुजनिवहास्तं प्रयान्तं पदेन
श्रुत्वा मोदाद्भरितमनसः पूर्णकुम्भान् गृहीत्वा।
सर्वैर्वाद्यैश्श्रवणसुखदैर्नेतुकामा मुनीशं
प्रत्युद्याता विनयमसृणा भासुरा भूसुराद्याः ॥ **17** ॥

सस्यानि तप्तानि यथा पृथिव्यां
दृष्ट्वा पयोदं प्रमदं प्रयान्ति।
भवाग्नितप्ताः सकलाश्च दृष्ट्वा
मूर्तिं तदीयां मुदिता बभूवुः ॥ **18** ॥

श्वेताद्रिमुख्येषु रमानिवासं
संसेव्य तद्दिव्यदयामवाप्य।
सम्भावनां चाप्यकरोत् समग्रां
देवालयानामधिकारभाजाम् ॥ **19** ॥

अनुग्रहं प्राप्य रमाधिनेतुः
    वेदान्तरामानुजदेशिकेन्द्रः।
समावृतः पौरजनैस्समस्तैः
    प्रदक्षिणेन प्रजगाम वीथीः॥ 20 ॥

सर्वे जनास्साधुजनाग्रगण्यं
    सन्द्रष्टुकामा मुनिराजमेनम्।
भक्त्या विनम्रास्त्वरयोपपन्नाः
    त्यक्तान्यकार्याश्च तदा बभूवुः॥ 21 ॥

ते संप्राप्यानुग्रहं योगिवर्यात्
    नीत्वा ग्रामं योगिवर्याग्रगण्यम्॥
छात्रैस्सर्वै रङ्गनाथेन साकं
    दिव्यां पूजां चक्रिरे भक्तिपूर्णाः॥ 22 ॥

इत्थं स योगी सकलाभिवन्द्यः
    संपूजयन् श्रीरमणं च काले।
तापादि संस्कारविधींश्च कुर्वन्
    सर्वान् ययौ संवसथान् क्रमेण॥ 23 ॥

पुनश्च सन्तुष्टमना महात्मा
    सद्भिः परीतस्सकलाभिवन्द्यः।
स्मरन् स्वकीये हृदये सिताद्रेः
    नाथं रमाभूसहितं प्रपेदे॥ 24 ॥

करे त्रिदण्डमावहन् कषायसिक्तवाससा
    स्फुरत्तटित्स्वतेजसा प्रबोधसंपदापि च।
समानतां वहन् यतिर्यतीश्वराख्य योगिना
    सिताद्रिनाथ सेवने प्रतिष्ठते स्म सादरम्॥ 25 ॥

श्रुत्वा मुनेरागमनं च भूयः
श्वताद्रिनाथालय धर्मपाद्याः।
वाद्यादिभिर्वारिघटान् गृहीत्वा
प्रत्युद्गताः श्री शठकोपयुक्ताः॥ 26॥

प्रणम्य निन्युर्निखिलप्रमोद -
करं मुनिं तं सकलाभिवन्द्यम्।
सर्वे च देवालयमाशु शौरिः
नन्दस्य सद्मेव हि वासुदेवम्॥ 27॥

दृष्ट्वा रमेशं धवलाद्रिवासं
नष्टं धनं प्राप्य यथा दरिद्रः।
अमान्तमानन्दपयोनिधिं तं
अन्तर्मनस्संबिभरां बभूव॥ 28॥

आस्तां चेतसि मे निरन्तरमसावम्भोधरश्श्यामलः
पुण्ये श्रीमति पुण्डरीकनयनः श्वेताचले तस्थिवान्।
प्राप्य प्रापक भावमात्मसुलभं प्रत्यक्षतो दर्शयन्
रक्षिष्यामि शुचं त्यजेत्यविरतं यो व्याकरोति ध्रुवम्॥ 29॥

सङ्गृह्णात्यङ्घ्रिपद्मं धवलनगपतेः मन्दमभ्येति जङ्घां
ऊरुद्वन्द्वान्तरास्ते प्रविशति शनकैः निम्ननाभिं क्रमेण।
वक्षः पर्येति पद्मां प्रणमति वलते दोष्षु वक्त्राब्जशोभां
सानन्दं मन्मनीषा धयति मकुटगं जिघ्रति स्रक्सुगन्धम्॥ 30॥

आख्यानं तव सुन्दरं तव पदाम्भोजद्वयं सुन्दरं
पादाग्रं तव सुन्दरं तव हरे ! गुल्फद्वयं सुन्दरम्।
जान्वंशस्तव सुन्दरस्तव परं जङ्घायुगं सुन्दरं
स्वामिन् श्वेतमहीधरेश ! भवतः सर्वं परं सुन्दरम्॥ 31॥

मध्यं सुन्दरमाद्यनाभिकमलं ते सुन्दरं सुन्दरं
वक्षस्सुन्दरमिन्दिराङ्कमखिलं त्वत्कन्धरस्सुन्दरः।
दोर्बृन्दं तव सुन्दरं तव कराम्भोजव्रजस्सुन्दरः
स्वामिन्! श्वेतमहीधरेश! भवतः सर्वं परं सुन्दरम्॥ 32॥

भ्रूयुग्मं तव सुन्दरं श्रुतियुगं ते सुन्दरं सुन्दरः
फालस्ते शतवक्रकुन्तलभरस्ते सर्वतस्सुन्दरः।
सद्रत्नोज्वलदिव्यरत्नमकुटस्ते सुन्दरस्सुन्दरा
दाराः श्वेतमहीधरेश! भवतः सर्वं परं सुन्दरम्॥ 33॥

वस्त्रं सुन्दरमस्त्रभूषणगणस्ते सुन्दरस्सुन्दरं
श्रीमच्चम्पककाननं शुभगुणास्सर्वेऽपि ते सुन्दराः।
ऐश्वर्यं तव सुन्दरं परतरास्ते षड्गुणास्सुन्दराः
स्वामिन्! श्वेतमहीधरेश! भवतः सर्वं परं सुन्दरम्॥ 34॥

शैलेन्द्रस्तव सुन्दरः परतरं त्वन्मन्दिरं सुन्दरं
त्वद्भक्ता बहुसुन्दराः तव हरे! सर्वोत्सवास्सुन्दराः।
कैङ्कर्यं तव सुन्दरं तव तनुध्यानं परं सुन्दरम्
स्वामिन्! श्वेतमहीधरेश! भवतः सर्वं परं सुन्दरम्॥ 35॥

एवं विधस्तोत्रशतैरपूर्वैः
योगीश्वरः श्रोत्रसुखावहद्भिः।
ध्यात्वा स्वशीर्षे विहिताञ्जलिस्सन्
श्वेताद्रिनाथं शरणं प्रपेदे॥ 36॥

श्वेताचलपतेर्ध्यानसोपानं मुनिना कृतम्।
यः पठेल्लभते सोऽपि पुमर्थान् सर्व सुन्दरान्॥ 37॥

तदा मुरारिर्मुनिसार्वभौम
गीतानि शृण्वन् श्रुतिकोमलानि।
दिदेश तस्मै परया च तृप्त्या
स्वानुग्रह ज्ञापक कुञ्जरेन्द्रम्॥ **38**॥

पत्या रमाया दयया प्रदत्तं
तं कुञ्जरं श्रीयतिकुञ्जरोऽसौ।
स्वीयावतारस्थल दिव्यदेश -
देवामुद प्रीतिकरं चकार॥ **39**॥

दत्वा वरेण्योऽपरवारणं च
श्रीवारणाद्रीश्वर पूजनाय।
पूजादिकं सर्वमयं यथावत्
अकारयद्योगिवराग्रगण्यः॥ **40**॥

कर्णाटदेशे नगरीश्च सर्वाः
ग्रामानसङ्ख्यानधिगम्य योगी।
रक्षन् जनान् मन्त्रवरप्रदानैः
क्रमेण चेमां नगरीं प्रपेदे॥ **41**॥

वेदमौळियुगलार्यभाष्यकृत्
भाष्यकृन्मुनिरिवा परोऽधुना।
वर्ततेऽत्र महिषापुरोत्तमे
कीर्तिरस्य वितता दिगन्तरे॥ **42**॥

आश्रितुं मुनिवरं द्विजोत्तमाः
आगमान्तगुरुवद्व्यवस्थितम्।
आगता विविधशास्त्रपारगाः
अङ्गिरस्तनुभवं यथाऽमराः॥ **43**॥

भूसुरास्सुभगवेषभासुराः
    भूमिपा विविधदेश नायकाः।
ऊरुजाः प्रमुदिता धनञ्जयाः
    आश्रयन् चरण सम्भवा मुनिम्॥ **44**॥

लक्ष्मणाख्यमुनिना तु ये पुरा
    देशिका इति मृगाधिपासने।
स्थापिता मुनिवरं समाश्रयन्
    तत्कुलोद्भव महीसुरोतमाः॥ **45**॥

पञ्चसंस्कृतिमवाप्य केचन
    भ्राजमानवपुषो मुनीश्वरात्।
शाणघर्षण परिष्कृता इव
    प्राप्नुवन् परमकान्तिमद्भुताम्॥ **46**॥

मन्त्रार्थान् वै केचिदापुर्मुनीशात्
    श्रीमद्भाष्यं केचिदस्मादगृह्णन्।
गीतामन्ये केचन श्रीरहस्यं
    केचित् प्रापुर्द्राविडं वेदमौळिम्॥ **47**॥

एवं सर्वे स्वाधिकारानुगुण्यात्
    सर्वान् ग्रन्थान् प्राप्य योग्यग्रगण्यात्।
ज्ञानैः पूर्णास्तेजसाऽऽदित्य कल्पाः
    वेषैर्मुग्धा रेजिरे छात्रवर्गाः॥ **48**॥

नन्दसूनुरिव गाः प्रचालयन्
    रामवत्सुभग लक्ष्मणान्वितः।
पक्षिराडिव सुकीर्तिसंयुत -
    श्चाण्डवन् मुनिवरो विराजते॥ **49**॥

पङ्कमर्दन विधानसंपदा
    साधुचक्रपरितोष कृत्यतः।
सर्वमोहतमसामपोहनात्
    त्वां वदाम इह पद्मबान्धवम्॥ **50** ॥

दुष्कराद्भवपयोधितारणात्
    दुर्जयाक्षविजयाद्गुणाधिकात्।
क्ष्माभवाभ्यधिकतोषदानतः
    त्वां वदाम इह मारुतात्मजम्॥ **51** ॥

गोकुले सतत सक्तमानसो
    जिह्मगार्तिकर वैभवान्वितः।
वासुदेव चरिताभिलाषवान्
    भासि योगिवर ! शूरसूनुवत्॥ **52** ॥

सक्तमच्युतकथासु सन्ततं
    सन्नतं जगति कीर्तिसञ्चयैः।
सञ्चयन्निखिलवैष्णवश्रियं
    त्वां श्रयाम इह भक्तिसंयुताः॥ **53** ॥

करुणाजलधे ! बहुबोधनिधे !
    शरणं भवतः पदपद्मयुगम्।
वयमद्यगता गतिशून्यतमाः
    कृपया परिपालय योगिनृप !॥ **54** ॥

जातावतारः कृपया धरण्यां
    न त्वं यदि स्याः मनुजास्समस्ताः।
वेदान्तसूरीन्द्रयतीन्द्रवाणी -
    सुधा रसज्ञाश्च कथं भवेयुः॥ **55** ॥

कृतावतारं मनुजा भवन्तं
गुरो ! समस्ताः प्रतिपद्य मन्त्रान्।
तापादि संस्कारविधींश्च लब्ध्वा
प्रबोधयुक्ताः प्रभवन्ति सार्थाः॥ **56** ॥

राजेति शब्दो जनरञ्जनेन
चन्द्रो यथाऽऽह्लादनकर्मणा च।
अज्ञानरूपान्ततमोनिरासात्
गुरुश्च शब्दस्त्वयिसार्थ एषः॥ **57** ॥

त्वत्पादाम्बुज रेणुरूषितशिराः यः पूरुषस्सोऽप्यसौ
गङ्गामज्जनसम्भवान्न गणयेत् शुद्धिं परां भूतले।
सम्यक् स्वादुतमं त्वदीयवचसामास्वादयेत् यो रसं
धिक्कुर्यादयमप्यहो ! मुनिवर ! द्राक्षां च मोचामपि॥ **58** ॥

आशास्सर्वा विमल विमलाः कुर्वते कीर्तयस्ते
आशास्सर्वा भुवि तव नृणां पूरयन्ति प्रसादाः।
आशास्सर्वा अमृतविषये ते त्यजन्ति स्वकीयाः
आशास्सर्वा स्तव तु वचने ये बुधा निक्षिपन्ति॥ **59** ॥

स्मारं स्मारं हृदयजलजे त्वत्कथां पुण्यशीलाः
दर्शं दर्शं नयन फलदं ते मुने ! दिव्यरूपम्।
पायं पायं चरणसलिलं पावनं जाह्नवीवत्
गाहं गाहं प्रमदजलधौ वर्तमाना वयं भोः॥ **60** ॥

सुरद्रुमस्त्वं श्रितनन्दनत्वात्
सदाश्रितत्वात् सुमनोगणैश्च।
नतामृत प्रायफल प्रदानात्
युक्तं हि चित्रं मधुपैर्विहीनः॥ **61** ॥

सोऽङ्ग वेद यदि वा न वेति च
श्रुतिपद्धतिर्वदति संशयेन वै।
नियतं भवान् वयमिवार्य ! ते गुणान्
न विबुध्यते विविधशास्त्रवेद्यपि ॥ **62** ॥

अमुना यतिनरपतिना
त्रय्यन्तार्थावबोधरतमतिना।
पदयुगनतबुधततिना
कृतिना भवतैव नाथवन्तः स्मः ॥ **63** ॥

त्वं मनुषे गाङ्गेयं तृणवत् सर्वैर्जनैस्सदा सेव्यम्।
बहुमनुषे गाङ्गेयं गुरुवत् धर्मार्थवेदिभिर्गेयम् ॥ **64** ॥

वन्दे विश्वगुरोस्साक्षादाण्डवस्य पदाम्बुजम्।
अज्ञानतिमिरं हन्तुं ज्ञानभासः प्रकाशनात् ॥ **65** ॥

परमैकान्तिभिस्सद्भिः विद्वद्भिरभिसेवितम्।
बहिष्कृतरजस्सङ्गं नौमि वेदान्तलक्ष्मणम् ॥ **66** ॥

कल्याणान्यनिशं तनोत्यभिनव श्रुत्यन्तरामानुज
श्रीपादाब्जविनिर्गतामृतझरीपानं पुनः पावनम्।
इत्येवं हृदि चिन्तयत्यनुदिनं यः पुण्यशीलः पुमान्
सर्वं तस्य करस्थमेव सुकृतं यद्यस्ति पूर्वार्जितम् ॥ **67** ॥

एवं देशांश्च सर्वान् नगरमपि तथा यादवाद्रिं सिताद्रिं
गच्छन् योगीश्वरोऽसौ मधुरिपुसहितः तत्र तत्र स्थितानाम्।
शिष्याणां संवितन्वन् मनुवरसहितं पञ्चसंस्कारयोगं
भाष्यादीन् बोधयन् सन् यतिनृपतिसमो राजते स्मप्रकामम् ॥ **68** ॥

एवं वेदान्तयोगी स्वपदमुपगतान् भासुरान् भूसुरादीन्
संस्कारैः पञ्चभिर्वा मनुवितरणतः पालयन् शिष्यवर्गान्।
शास्त्रज्ञान् बोधयन् सन् वकुलधरकृतीः रङ्गनाथं त्रिकालं
भक्त्या संपूजयन् सन्नपर इव शुको भूतले वर्तते स्म॥ **69**॥

आनन्दः कमनीयविग्रहयुतश्चक्षुष्मतामास्पदं
भानुर्मौढ्य महान्धकारदलने शीतांशुरानन्दने।
सौम्यस्सत्सुमतौ गुरुर्गुरुरयं श्रुत्यन्तरामानुजः
विश्वासस्सुमनस्ततेः विजयतामाचन्द्रमातारकम्॥ **70**॥

नमो नमो महागुरो चिरेण मेऽद्य चक्षुषी
कृतार्थतामुपागते सुखागतं दयानिधे।
इहार्पितं शुभासनं समेत्य भावुकानिमान्
इमं जनं त्वदाश्रितं निषिञ्च वीक्षणामृतैः॥ **71**॥

मदीयपूज्यदेवता बभूवुरद्य पूजिताः
फलोन्मुखं पुराकृतं शुभं च कर्ममेऽधुना।
पलायते स्म दुर्गतिः शुभानि मामुपासते
यतोऽस्म्यहं त्वदीक्षणामृताब्धि वीचिशीतलः॥ **72**॥

सर्वस्वार्पणभावेन स्वागतं ते ब्रवीम्यहम्।
पाद्यार्घ्याचमनीयार्थे भक्तिर्मे सहजाऽस्त्वियम्॥ **73**॥

दृष्ट्वा धन्यतमा बभूविम वयं त्वामद्य सद्देशिकं
पूर्णेन्दुं शरदीव कैरवकुलान्यानन्द नाडिन्धमम्।
वत्सा गामिव वत्सलामुपगतामापीन भारोज्वलां
वर्षाम्भोधरमम्बु संभृततनुं दृष्ट्वा यथा चातकाः॥ **74**॥

स्वामिन् ! नमस्ते भवदुःखहारिन् !
त्रैलोक्यपूज्याभिगुणाकराय।
श्रीवासयोगीश्वरजन्मधन्ये
पुष्येऽभिजाताय तथाविधाय॥ **75** ॥

स्वामिन् ! त्वदीय पदपद्मयुगं भजन्तो
लोके भवन्ति किल मूढधियोऽपि सुज्ञाः।
विज्ञानकल्पतरुमूलमधिश्रयन्तो
ज्ञानप्रभासमतुलं कथमेव नापुः॥ **76** ॥

आम्नायमौलिदेशिक
भूम्ना वैराग्य मुख्यगुणवितते:।
धाम्नाऽभिनव नम्माण्डव
नाम्नाऽलं नाथवानहं विजये॥ **77** ॥

चित्ते सन्निधिमातनोतु सततं सोमाभिरामाननः
कामातङ्क कलङ्कपङ्किलहृदां धीमान्द्यमुन्मूलयन्।
मन्दस्मेरमुखांबुजः श्रितजनानानन्दयन्वीक्षणैः
श्रीनम्माण्डवसूरिरद्भुतगुणः प्रेमानुकम्पोल्बणैः॥ **78** ॥

आनन्दाश्रु कणाभिराम नयनः सापेक्ष विद्वज्जनान्
नित्यं श्रीपतिसद्गुण प्रवचनैः आसायमानन्दयन्।
चित्ते सन्ततमाविरस्तु भगवद्भक्तेः विहारस्थली
सोऽयं वेदवतंस लक्ष्मणगुरुः धीमान् प्रसन्नाश्रयः॥ **79** ॥

वेदान्तविज्ञानसुनिश्चितार्थ
सन्दर्शकायास्तु नमो नमस्ते।
वेदान्तरामानुज ! दिव्यकीर्ते !
भवाब्धिकुम्भोद्भवदेशिकाय॥ **80** ॥

श्रीमन्नाण्डवसार्वभौम ! भवते कुर्मो नतीनां ततीः
धन्याः स्मो भवदीयपूर्णकरुणालोकेन संभाविताः।
कर्णाटक्षितिमण्डले शुभवहक्षेत्रेषु पुण्ये चिरात्
आवासाद्भवदीयदर्शनमभूदस्माकमक्लेशतः ॥ **81** ॥

स्वामिन्नाण्डववर्य ! केन कथय त्वां तोलयामो वयं
यन्मर्त्येष्वमरेषु वा न हि समस्ते नित्यमुक्तेषु वा।
त्वत्पारम्यमवैति नापि स हरिः न त्वं च शीलोदधे !
तत्त्वां त्वत्सदृशं गृणन्ति सुधियो योगीन्द्र ! तुभ्यं नमः ॥ **82** ॥

वन्दे कारुण्यपूरप्रसवितृनयनं त्वाण्डवं तीर्थमीड्यं
यन्नामोल्लापमात्रात् प्रशमितदुरिताः सेवया धन्यधन्याः।
यं प्राहुस्संयमीन्दुं शठरिपुमपि वा वेदचूडार्यमूर्तिं
वाणीमाध्वी यदीया विबुधमधुकरैः काममास्वादनीया ॥ **83** ॥

यस्यान्तेवासितां तां त्वरिततरहृदः कौतुकात् प्रार्थयन्ते
यस्याभाति त्रिदण्डी चिदचिदपि परं चेति तत्त्वत्रयस्य।
स्थित्यादि स्थापनार्थं पृथगभिकलिता केतुदण्डत्रयीव
सोऽयं वेदान्तयोगी जगति विजयतामग्रयायी यतीनाम् ॥ **84** ॥

कल्याणैरवलोकनैस्सकरुणैरानन्दयन् बन्धुरैः
श्रीनम्माण्डव एवमागत इव त्रय्यन्तरामानुजः।
शान्तस्वान्तजनाग्रणीः सुमनसां स्तोमार्च्य पादाम्बुजः
क्षेमाण्यानमतां विधातुमुदितो भूमावसौ राजताम् ॥ **85** ॥

जयतु श्रीरङ्गपुरी जयतु च तदलङ्कृती रमारमणः।
जयतु च तद्भक्तगुरुः जयतु च तच्छक्तिमद्भिरक्तिपदम् ॥ **86** ॥

श्रीशैलकुलसंभूत लक्ष्मीनन्दननन्दनः।
श्रीमदाण्डवसेवोत्थ रोमाञ्चोद्गम कञ्चुकः॥ **87** ॥

तदीयाभ्युदयस्तुत्या तदाराधनमीहते।
तदीयमुखपद्मस्य विकासाय भवेदियम्॥ **88** ॥

॥ इति श्रीमदाण्डवाभ्युदयं समाप्तम्॥